# यजुरुपाकर्म

## 1 आवणि अविट्टम्

01/08/2012

### 1.1 स्नानम्

### 1.2 प्रातःसन्ध्यावन्दनम्

### 1.3 केवलं ब्रह्मचारिणे (only for brahmacāris)

समिदाधानम्

वपनम्

स्नानम्

यज्ञोपवीतधारणम्

See 1.9

### 1.4 काममन्युजपः

(Not for first-time avani avittam)

Do **आचमनम्**

**पवित्रं धृत्वा। दर्भेष्वासीनः। दर्भान् धारयमाणः।** (Put on pavitram and sit on darbha)

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।

ॐ भूः। ॐ भुवः। ओ३ सुवः। ॐ महः। ॐ जनः। ॐ तपः। ओ३

स॒त्यं। ॐ तत्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्रचो॒दया᳚त्॥

ओमापो॒ ज्योति॒रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुवः॒ सुव॒रोम्॥

ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं। तदेव लग्नं सुदिनं तदेव। ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव। श्री लक्ष्मीपतेः अंघ्रियुगं स्मरामि। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभन्तरः शुचिः।मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीरामस्मरणेनैव व्यपोहति न संशयः। श्री राम राम राम तिथिर्विष्णुः। तथा वारः। नक्षत्रं विष्णुरेव च। योगश्च करणं चैव। सर्वं विष्णुमयं जगत्। श्री गोविन्द गोविन्द गोविन्द। अद्य श्री भगवतः महा पुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीय-परार्द्धे श्वेतवराह-कल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे [1]शकाब्दे अस्मिन् वर्तमाने व्यावहारिके

1 Priests in other countries are known to substitute the names of local geographical details. We do not have these details. There is another school of thought which holds that jambūdvīpa denotes the entire inhabited planet.

प्रभवादि षष्टि-संवत्सराणां मध्ये नन्दन नाम संवत्सरे दक्षिणायने वर्षर्तौ[2]

श्रावणमासे शुक्लपक्षे अद्य पौर्णमास्यां शुभतिथौ सौम्यवासर-युक्तायां

उत्तराषाढ-नक्षत्र-युक्तायां शुभयोग शुभकरण एवं गुण-विशेषण-विशिष्टायां

अस्यां पौर्णमास्यां शुभतिथौ तैष्यां पौर्णमास्यां अध्यायोत्सर्जन अकरण

प्रायश्चित्तार्थम् अष्टोत्तर सहस्रसंख्यया कामोकार्षीन्-मन्युरकार्षीन्-

महामन्त्रजपं करिष्ये।

दर्भान् निरस्य। अप उपस्पृश्य। (Throw darbha away and touch water.)

ॐ भूः...। १०

कामोकर्षीत्। मन्युरकार्षीत्। १००८

ॐ भूः...। १

कामोकर्षीन्मन्युरकार्षीदुपस्थानं करिष्ये।

अभिवादये...।

ॐ तत् सद् ब्रह्मार्पणमस्तु।

पवित्रं विसृज्य (Throw pavitram away.)

2 In Southern Hemisphere use “शिशिरर्तौ”

## 1.5 माद्ध्याह्निकम्

## 1.6 ब्रह्मयज्ञः

Do आचमनम्

ॐ शुक्लाम्बरधरं ...

ॐ भूः ...

ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं ब्रह्मयज्ञं करिष्ये।

ब्रह्मयज्ञेन यक्ष्ये।

विद्युदसि विद्य मे पाप्मानमृतात् सत्यमुपैमि। ॐ| (Touch water and wipe the hand.)

ॐ भूः तत्सवितुर्वरेण्यम्। ॐ भुवः भर्गो देवस्य धीमहि। ओ३ सुवः धियो यो नः प्रचोदयात्। ॐ भूः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। ॐ भुवः धियो यो नः प्रचोदयात्। ओ३ सुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

ॐ इषेत्वोर्जे त्वा वायवस्थोपायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे॥

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि॥

ॐ शन्नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑। शंयोर॒भिस्र॑वन्तु नः॥ (Take water and sprinkle around the head.)

सत्यं तपः श्रद्धायां जुहो॑मि।

नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नम॑ः पृ॒थि॒व्यै नम॒ ओष॑धीभ्यः।

नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे बृ॒ह॒ते क॑रो॒मि॥ (3 times)

वृष्टि॑रसि॒ वृश्च॑ मे पा॒प्मान॑मृ॒तात्स॒त्यमुपा॑गाम्। (Touch water)

## देवर्षिपितृ-तर्पणम्

Whose father is alive:

देवर्षि-तर्पणं करिष्ये।

Whose father is dead:

देवर्षिपितृ-तर्पणं करिष्ये।

## देव-तर्पणम्

(yajñopavīta in the normal way, once each, with water flowing over the tips of the fingers.)

1. ब्रह्मादयो ये देवास्तान् देवाꣳस्तर्पयामि।
2. सर्वान् देवाꣳस्तर्पयामि।
3. सर्वदेवगणाꣳस्तर्पयामि।
4. सर्वदेवपत्नीस्तर्पयामि।
5. सर्वदेवगणपत्नीस्तर्पयामि।

## ऋषि-तर्पणम्

(yajñopavīta as mālā, twice each, palms should be held against each other, and water should flow between the palms through the middle.)

1. कृष्णद्वैपायनादयः ये ऋषयः तान् ऋषीꣳस्तर्पयामि।
2. सर्वान् ऋषीꣳस्तर्पयामि।
3. सर्वर्षिगणाꣳस्तर्पयामि।
4. सर्वर्षिपत्नीस्तर्पयामि।
5. सर्वर्षिगणपत्नीस्तर्पयामि।
6. प्रजापतिं काण्डर्षिं तर्पयामि।
7. सोमं काण्डर्षिं तर्पयामि।
8. अग्निं काण्डर्षिं तर्पयामि।
9. विश्वान् देवान् काण्डर्षीꣳस्तर्पयामि।
10. सांहितीर्देवता उपनिषदस्तर्पयामि।
11. याज्ञिकीर्देवता उपनिषदस्तर्पयामि।
12. वारुणीर्देवता उपनिषदस्तर्पयामि।
13. हव्यवाहं तर्पयामि।
14. विश्वान् देवान् काण्डर्षीꣳस्तर्पयामि।
15. ब्रह्माणꣳस्वयंभुवं तर्पयामि। (Raise the right hand with fingers

pointed upwards.  Water should flow down the left side of right palm.)

16. विश्वान् देवान् काण्डर्षीꣳस्तर्पयामि।
17. अरुणान् काण्डर्षीꣳस्तर्पयामि।
18. सदसस्पतिं तर्पयामि।

For the remaining water should flow from the tip of the fingers.

19. ऋग्वेदं तर्पयामि।
20. यजुर्वेदं तर्पयामि।
21. सामवेदं तर्पयामि।
22. अथर्ववेदं तर्पयामि।
23. इतिहासपुराणं तर्पयामि।
24. कल्पं तर्पयामि।

(Those with fathers should put yajñopavīta normally and do ācamanam and proceed to mahāsaṁkalpaḥ.)

## पितृ-तर्पणम्

1. सोमः पितृमान् यमोंगिरसान् अग्निकव्यवाहनादयः ये पितरः तान् पितॄꣳस्तर्पयामि।
2. सर्वान् पितॄꣳस्तर्पयामि।
3. सर्वपितृगणाꣳस्तर्पयामि।

4. सर्वपितृपत्नीस्तर्पयामि।

5. सर्वपितृगणपत्नीस्तर्पयामि।

6. ऊर्जं वहन्ती अमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे देवर्षिपितृन् तृप्यत तृप्यत तृप्यत।

(Put yajñopavīta normally and do ācamanam.)

## 1.7 महासंकल्पः

Do आचमनम्

ॐ शुक्लाम्बरधरं ...

ॐ भूः ...

ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं। तदेव लग्नं सुदिनं तदेव। ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव। श्री लक्ष्मीपतेः अंघ्रियुगं स्मरामि। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभन्तरः शुचिः।मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीरामस्मरणेनैव व्यपोहति न संशयः। श्री राम राम राम तिथिर्विष्णुः। तथा वारः। नक्षत्रं विष्णुरेव च। योगश्च करणं चैव। सर्वं विष्णुमयं जगत्। श्री गोविन्द गोविन्द गोविन्द। अद्य श्री भगवतः आदिविष्णोः आदिनारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणस्य महा

जलौघस्य मध्ये परिभ्रमताम् अनेककोटि ब्रह्माण्डानां मध्ये एकतमे पृथिव्यप्तेजवायुवाकाशाहङ्कारादि महदव्यक्तैरावरणैरावृतेऽस्मिन् महति ब्रह्माण्ड-करण्ड-मध्ये आधार शक्ति कूर्मानन्दादि अष्टदिग्गजोपरि प्रतिष्ठितस्य अतल- वितल- सुतल- रसातल- तलातल- महातल- पातालाख्य लोकसप्तकस्य उपरितले पुण्यकृतां निवासभुते भूर्भुवस्सुवर्महर्जनस्तपस्सत्याख्य लोकषट्कस्य  अधो भागे महानालायमान फणिराजशेषस्य सहस्र फणमणिमण्डलमण्डिते  दिग्दन्ती शुण्डादण्डोत्तम्भिते  पञ्चषट्कोटियोजनविस्तीर्णे लोकालोक अचलेन वलयिते लवणेक्षु- सुरा- सर्पि- दधि- क्षीरोदकार्णवैश्च परिवृते जम्बु- प्लक्ष- शाक- शाल्मलि- कुश- क्रौञ्च- पुष्कराख्य-सप्तद्वीपानां मध्ये *जम्बूद्वीपे भारतवर्षे भरतखण्डे प्रजापतिक्षेत्रे दण्डकारण्य- चंपकारण्य- विन्ध्यारण्य- वीक्षारण्य- वेदारण्यादि- अनेक पुण्यारण्यानां मध्यप्रदेशे रामसेतुकेदार्योः मध्यप्रदेशे भागीरथी- गौतमी- कृष्णवेणी- यमुना- नर्मदा- तुङ्गभद्रा- त्रिवेणी- मलापहारिणि- कावेरी इत्यादि अनेक पुण्य- नदी- विराजिते इन्द्रप्रस्थ यमपस्थ आवन्तिकापुरी हस्तिनापुरी अयोध्यापुरी मायापुरी काशीपुरी काञ्चीपुरी द्वारकादि अनेक- पुण्य- पुरी- विराजिते*[3] सकल- जगत्- स्रष्टुः

---

3 Different readings for the portion in italics are found in various sources. Since any way this is a description of the location where you do the japa, it needs some

परार्द्धद्वय- जीविनः ब्रह्मणः प्रथमपरार्द्धे पञ्चाशदब्दात्मके अतीते द्वितीयपरार्द्धे पञ्चाशदब्दादौ प्रथमे सम्वत्सरे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे प्रथमेऽह्नि द्वितीये यामे तृतीये मुहूर्ते स्वायंभुव- स्वारोषिच- उत्तम- तामस- रैवत- चाक्षुषाख्येषु षट्सु मनुसु व्यतीतेषु सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कृत-त्रेत-द्वापर-कलियुगात्मके चतुर्युगे तत्र कलियुगे सौर- चान्द्र-सावन-नाक्षत्र-मानैः अनुमिते प्रभवादीनां षष्टिसंवत्सराणां मध्ये खर नाम संवत्सरे दक्षिणायने  वर्षर्तौ श्रावणमासे शुक्लपक्षे अद्य पौर्णमास्यां शुभतिथौ सौम्यवासर-युक्तायां उत्तराषाढ-नक्षत्र-युक्तायां शुभयोग शुभकरण एवं गुण-विशेषण-विशिष्टायां अस्यां पौर्णमास्याम् अनाद्यविद्यावासनया प्रवर्तमाने अस्मिन् महति संसारचक्रे विचित्राभिः कर्मगतिभिः विचित्रासु पशु-पक्षि-मृगादि-योनिषु अनेकधा पुनः पुनः जनित्वा केनापि पुण्यकर्म- विशेषेण इदानींतन मानुष्ये द्विजन्मविशेषं प्राप्तवतो मम जन्माभ्यासात् जन्मप्रभृति एतत् क्षणपर्यन्तं बाल्ये वयसि कौमारे यौवने वार्द्धके च जाग्रत्- स्वप्न- सुषुप्ति- अवस्थासु मनो- वाक्- काय- कर्मेन्द्रिय- ज्ञानेन्द्रिय- व्यापारैः काम- क्रोध- लोभ- मोह- मद- मात्सर्यादिभिः संभावितानाम् समपातकानाम् अतिपातकानाम् उपपातकानां सङ्करीकरणानां मलिनीकरणानाम् अपात्रीकरणानं जातिभ्रंशकरणानां प्रकीर्णकानां ज्ञानतः सकृत्कृतानाम्

consideration of which country you do the japa.

अज्ञानतः असकृत्कृतानां ज्ञानतोऽज्ञानतश्च अभ्यस्तानां निरन्तराभ्यस्तानां चिरकालाभ्यस्तानां नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां सद्यः अपनोदनार्त्थम् अश्वत्थनारायण- सन्निधौ देव- ब्राह्मण- सन्निधौ त्रयस्त्रिम्शत्कोटि- देवता- सन्निधौ सीता- लक्ष्मण- भरत- शत्रुघ्न- हनूमत्- समेत श्री रामचन्द्र- स्वामि- सन्निधौ श्री रुक्मिणि- सत्यभामा- समेत श्री गोपालकृष्ण- स्वामि- सन्निधौ श्री हरिहरपुत्र- स्वामि- सन्निधौ श्री लक्ष्मीनारयाणस्वामि- सन्निधौ श्रावण्यां पौर्णमास्याम् अध्यायोपाकर्म करिष्ये। तदङ्गं श्रावणि पौर्णमासि पुण्यकाले स्नानं करिष्ये। अतिक्रूर महाकाय कल्पंदहनोपम भैरवाय नमस्तुभ्यम्। अनुज्ञां दातुमर्हसि।

## 1.8 स्नानम्

## 1.9 यज्ञोपवीतधारणम्

Do आचमनम्

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।

ॐ भूः। ॐ भुवः। ओꣳ सुवः। ॐ महः। ॐ जनः। ॐ तपः। ओꣳ सत्यं। ॐ तत्स॑वि॒तुर्वरे॓ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्रचो॒दया॓त्॥ ओमापो॒ ज्योति॒रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒ः सुव॒रोम्॥

ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं श्रौत-स्मार्त-विहित-सदाचार-नित्य-कर्मानुष्ठान-योग्यता-सिद्ध्यर्थं ब्रह्मतेजोभिवृद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये।

यज्ञोपवीतमित्यस्य मन्त्रस्य परब्रह्मर्षिः। त्रिष्टुप्च्छन्दः। परमात्मा देवता। यज्ञोपवीतधारणे विनियोगः।

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्ताद् आयुष्यम् अग्रियं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः। (आचम्य उपवीतम्। Put on the new yajñopavīta and do आचमनम्)

भिन्नतन्तुं जीर्णं कश्मलदूषितं विसृज्यामि जले ब्रह्मवर्चो दीर्घायुरस्तु मे। (जीर्णं विसृज्य आचमनम्। (Throw away the old yajñopavīta and do आचमनम्)

## 1.10 काण्डर्षि-तर्पणम्

Do आचमनम्

ॐ शुक्लाम्बरधरं ...

ॐ भूः ...

ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं श्रावण्यां पौर्णमास्याम् अध्यायोपाकर्मणि काण्डर्षितर्पणं करिष्ये।

(yajñopavīta as mala, 3 times with gingelly and akṣata.)

प्रजापतिं काण्डर्षिं तर्पयामि।

सोमं काण्डर्षिं तर्पयामि।

अग्निं काण्डर्षिं तर्पयामि।

विश्वान् देवान् काण्डर्षीꣳस्तर्पयामि।

सांहितीर्देवता उपनिषदस्तर्पयामि।

याज्ञिकीर्देवता उपनिषदस्तर्पयामि।

वारुणीर्देवता उपनिषदस्तर्पयामि।

ब्रह्माणꣳस्वयंभुवं तर्पयामि।

सदसस्पतिं तर्पयामि।

Do आचमनम्

## 1.11 होमः

## 1.12 वेदारम्भः

# 2 गायत्री-जपः

02/08/2012

Do आचमनम्

पवित्रं धृत्वा। दर्भेष्वासीनः। दर्भान् धारयमाणः। (Put on pavitram and sit on darbha)

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।
ॐ भूः। ॐ भुवः। ओ॑ सुवः। ॐ महः। ॐ जनः। ॐ तपः। ओ॑ सत्यं। ॐ तत्स॑वितुर्वरे॓ण्यं भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्रचो॒दया॓त्॥
ओमापो॒ ज्योति॒रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒ः सु॒वरोम्॥
ॐ ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-परमेश्वर-प्रीत्यर्थं। तदेव लग्नं सुदिनं तदेव। ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव। श्री लक्ष्मीपतेः अंघ्रियुगं स्मरामि। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभन्तरः शुचिः।मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीरामस्मरणेनैव व्यपोहति न संशयः। श्री राम राम राम तिथिर्विष्णुः। तथा वारः। नक्षत्रं विष्णुरेव च। योगश्च करणं चैव। सर्वं विष्णुमयं जगत्। श्री गोविन्द गोविन्द गोविन्द। अद्य श्री भगवतः महा पुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीय-परार्द्धे श्वेतवराह-कल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्टि-संवत्सराणां मध्ये नन्दन नाम संवत्सरे दक्षिणायने वर्षर्तौ श्रावणमासे कृष्णपक्षे अद्य प्रथमायां शुभतिथौ गुरुवासर-युक्तायां श्रवण-

नक्षत्र-युक्तायां शुभयोग शुभकरण एवं गुण-विशेषण-विशिष्टायां अस्यां प्रथमायां शुभतिथौ मिथ्याधीत प्रायश्चित्तार्थं संवत्सर प्रायश्चित्तार्थं दोषवद् अपतनीय प्रायश्चित्तार्थम् अष्टोत्तरसहस्रसंख्यया गायत्री महामन्त्रजपं करिष्ये।

दर्भान् निरस्य। अप उपस्पृश्य। (Throw darbha away and touch water.)

प्रणवस्य ...।

ॐ भूः ...। १०

आयातु वरदा देवी ...।

गायत्री १००८

ॐ भूः ... । १

गायत्र्युपस्थानं करिष्ये।

(Do the remaining part of prātaḥsandhyāvandanam. Remove pavitram and do ācamanam.)